# १. एहि अन्नपूर्णे

## रागं: पुन्नागवराळि (८)
## ताळं: आदि

## *पल्लवि*

एहि अन्नपूर्णे सन्निधेहि सदा पूर्णे सुवर्णे

## *अनुपल्लवि*

पाहि पञ्चाशद्वर्णे श्रियं देहि रक्तवर्णे अपर्णे

## *चरणम्*

काशीक्षेत्रनिवासिनि कमललोचनविशालिनि वि-
श्वेशमनोल्लासिनि जगदीश गुरुगुह पालिनि विद्रुम

(*मध्यमकालसाहित्यम्*)

पाशिनि पुन्नागवराळि प्रकाशिनि षट्त्रिंशत्तत्ववि-
कासिनि सुवासिनि भक्तविश्वासिनि चिदानन्दविलासिनि

✠ ✠ ✠ ✠ ✠

# २. कमलाम्बिकायास्तव भक्तोऽहम्
## (षष्ठ्यावरणकीर्तनम्)
### रागं: पुन्नागवराळि (८)
### ताळं: रूपकम्

## *पल्लवि*

कमलाम्बिकायास्तव भक्तोऽहं
शङ्कर्याः श्रीकर्याः सङ्गीतरसिकायाः श्री

## *अनुपल्लवि*

सुमशरेक्षुकोदण्डपाशाङ्कुशपाण्याः
अतिमधुरतरवाण्याः शर्वाण्याः कल्याण्याः

## (*मध्यमकालसाहित्यम्*)

रमणीय पुन्नागवराळि विजितवेण्याः श्री

## *चरणम्*

दशकलात्मकवह्निस्वरूपप्रकाशान्तर्दशार-
सर्वरक्षाकरचक्रेश्वर्याः त्रिदशादिनुत-
कचवर्गद्वयमयसर्वज्ञादिदशशक्तिसमेत-
मालिनीचक्रेश्वर्याः त्रिदशविंशद्वर्ण-
गर्भिणीकुण्डलिन्याः दशमुद्रासमाराधितकौळिन्याः

## (*मध्यमकालसाहित्यम्*)

दशरथादिनुत गुरुगुह जनकशिवबोधिन्याः
दशकरणवृत्तिमरीचिनिगर्भयोगिन्याः श्री

✠ ✠ ✠ ✠ ✠

# ३. चन्द्रं भज मानस

## रागं: असावेरि (८)
## ताळं: मत्यम्

## पल्लवि

चन्द्रं भज मानस साधुहृदयसदृशम्

## अनुपल्लवि

इन्द्रादिलोकपालेडिततारेशं

## (मध्यमकालसाहित्यम्)

इन्दुं षोडशकलाधरं निशाकरं
इन्दिरासहोदरं सुधाकरमनिशम्

## चरणम्

शङ्करमौलिविभूषणं शीतकिरणं
चतुर्भुजं मदनच्छत्रं क्षपाकरम्
वेङ्कटेशनयनं विराण्मनोजननं
विधुं कुमुदमित्रं विधिगुरुगुहवक्त्रं श-

## (मध्यमकालसाहित्यम्)

शाङ्कं गीष्पतिशापानुग्रहपात्रं
शरच्चन्द्रिकाधवळप्रकाशगात्रम्
कङ्कणकेयूरहारमकुटादिधरं
पङ्कजरिपुं रोहिणीप्रियकरचतुरम्

✠ ✠ ✠ ✠ ✠

# ४. कुमारस्वामिनम्

## रागं: असावेरि (८)
## ताळं: आदि

## *पल्लवि*

कुमारस्वामिनं गुरुगुहं नमामि पदसरोरुहमहं श्री

## *अनुपल्लवि*

हिमाद्रिजासुतं सुरपतिनुतं हिरण्यमणिकुण्डलालङ्कृतम्

(*मध्यमकालसाहित्यम्*)

भ्रमात्मकविश्वकरं सुरवरं भ्रान्तिहरचतुरतरं शुभकरम्

## *चरणम्*

कार्तिकेयं बाहुलेयं काञ्चनमयदेहं शिखिवाहं
कार्तस्वरहारं श्रुतिसारं गर्वितशूरादिसंहारम्

(*मध्यमकालसाहित्यम्*)

पूर्तिविद्याप्रदं तत्पदं मूर्तिकरं मूलाज्ञानहरं
कीर्तिशालिनं विनतशूलिनं आर्तिभञ्जनमशेषरञ्जनम्

✠ ✠ ✠ ✠ ✠

# ५. सदाचलेश्वरम्

## रागं: भूपाळम् (९)

## ताळं: आदि

## पल्लवि

सदाचलेश्वरं भावयेऽहं चमत्कारपुरगेहं

(*मध्यमकालसाहित्यम्*)

गिरिजामोहम्

## अनुपल्लवि

सदाश्रितकल्पवृक्षसमूहं शरणागतदेवतासमूहं

(*मध्यमकालसाहित्यम्*)

उदाज्यकृतनामधेयवाहं चिदानन्दामृतप्रवाहम्

## चरणम्

चमत्कारभूपालादिप्रसादकरणनिपुणमहालिङ्गं
छायारहितदीपप्रकाशगर्भगृहमध्यरङ्गम्
समस्तदुःखादिहेतुभूतसंसारसागरभयभङ्गं
शमदमोपरत्यादिसंयुक्तसाधुजनहृदयसरसिजभृङ्गम्

(*मध्यमकालसाहित्यम्*)

कमलविजयकरविधृतकुरङ्गं करुणारससुधार्णवतरङ्गं
कमलेशविनुतवृषभतुरङ्गं कमलवदनगुरुगुहान्तरङ्गम्

✠ ✠ ✠ ✠ ✠

# ६. श्रीगुरुगुहमूर्ते

रागं: उदयरविचन्द्रिका (९)
ताळं: रूपकम्

## पल्लवि

श्री गुरुगुह मूर्ते चिच्छक्तिस्फूर्ते
शिष्यजनावनकीर्ते सुमुहूर्ते जय

## अनुपल्लवि

योगिनीहृदयप्रकाशचित्तवृत्ते
युगपद्भोगयोगप्रदाननिपुणशक्ते
आगमरहस्यतत्वानुसन्धानयुक्ते
आनन्दानुरक्ते अतिविरक्ते जय जय

## चरणम्

आत्मेश्वरजीवभेदावरणनिवृत्ते
आश्रितशिष्यानुग्रहकारणप्रवृत्ते
आत्मतत्वादिशोधनसाधनसंपत्ते
आरक्तश्वेतमिश्रचरणप्रवृत्ते
आत्मकोटिभक्ते अनादिमायोत्पत्ते
अत्मानुभवसारसंतृप्ते निर्मुक्ते

(*मध्यमकालसाहित्यम्*)

आत्मोदयरविचन्द्रिकासंदीप्ते
परमात्मश्रीचिदानन्दनाथ नमस्ते जय जय

✠ ✠ ✠ ✠ ✠

# ७. विश्वनाथं भजेऽहम्

## रागाङ्ग रागं: नटाभरणम् (१०)
## ताळं: आदि

### *पल्लवि*

विश्वनाथं भजेऽहं सततं विशालाक्षीशं परमेशम्

### *अनुपल्लवि* *(समष्टिचरणम्)*

नश्वरप्रपञ्चाधिष्ठानं नन्दितुरङ्गयानमीशानं

### (*मध्यमकालसाहित्यम्*)

उच्छ्वासाजपा नटाभरणं उत्तम गुरुगुह पूजितचरणम्

✠ ✠ ✠ ✠ ✠

# ८. कोदण्डरामम्

## रागाङ्ग रागं: कोकिलारवम् (११)
## ताळं: आदि

### *पल्लवि*

कोदण्डराममनिशं भजामि कोकिलारव जानकीरमणम्

### *अनुपल्लवि* *(समष्टिचरणम्)*

पादजपांसुपालिताहल्यं परमेश्वर गुरुगुह वात्सल्यं

### (*मध्यमकालसाहित्यम्*)

वेदान्तवेद्यमतिकौशल्यं विश्वामित्रहितमकौटिल्यम्

✠ ✠ ✠ ✠ ✠

# ९. श्री कृष्णं भज रे

## रागाङ्ग रागं: रूपवति (१२)
## ताळं: रूपकम्

### *पल्लवि*

श्री कृष्णं भज रे रे मानस श्री रूपवती गोपस्त्रीजारम्

### *अनुपल्लवि* *(समष्टिचरणम्)*

चक्रनिवारितभास्करप्रकाशं चन्द्रशेखर गुरुगुह विश्वासं

### *(मध्यमकालसाहित्यम्)*

अक्रूरवन्दितपदं अर्जुनप्रेमास्पदं
नक्रहतदन्तिवरदं नतशुकसनकनारदम्

✠ ✠ ✠ ✠ ✠

# १०. रामचन्द्रभक्तम्

रागङ्ग रागं: गेयहेज्जज्जि (१३)
ताळं: आदि

## पल्लवि

रामचन्द्रभक्तं भज मानस
राक्षसान्तकं हनुमन्तं श्री

## अनुपल्लवि *(समष्टिचरणम्)*

आमिषीकृतदिवाकरं गेयहेज्जज्जि रागप्रीतिकरं
सामदानभेददण्डचतुरं सद् गुरुगुह संमोदितं वरम्

✠ ✠ ✠ ✠ ✠

# ११. प्रसन्नवेङ्कटेश्वरम्

## रागाङ्ग रागं: वाटीवसन्तभैरवि (१४)
## ताळं: त्रिपुट

### *पल्लवि*

प्रसन्नवेङ्कटेश्वरं भज रे वाटीवसन्तभैरवीनुतं श्री

### *अनुपल्लवि* *(समष्टिचरणम्)*

प्रसिद्धतञ्जनगरस्थितं प्रबल गुरुगुह वेद्यमाद्यं

### *(मध्यमकालसाहित्यम्)*

वसिष्टवामदेवविदितं वरालमेलुमङ्गाश्रितं
रसिकशेखरं कृपाकरं रक्षितभक्तानन्दकरम्

✠ ✠ ✠ ✠ ✠